# श्री दुर्गा सहस्त्रनाम स्तोत्रम्
# Durga Sahasranama

Acharya Maitreya Astro Academy

www.amAstroAcademy.com

# अथ श्री दुर्गा सहस्रनाम स्तोत्रम्

अथ श्री दुर्गासहस्रनामस्तोत्रम्
अस्य श्री दुर्गासहस्रनामस्तोत्रमहामन्त्रस्य
हिमवानृषिः
अनुष्टुप्छन्दः
श्रीदुर्गा भगवती देवता
श्रीदुर्गा प्रसादसिद्ध्यर्थे सहस्रनामस्तोत्रपाठे विनियोगः

ध्यानम्
कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्रां
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसापूरयन्तीं
ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः
ॐ

शिवाऽथो मारमा शक्तिरनन्ता निष्कलाऽमला
शान्ता माहेश्वरी नित्या शाश्वता परमाक्षमा १
अचिन्त्या केवलानन्ता शिवात्मा परमात्मिका
अनादिरव्यया शुद्धा सर्वज्ञा सर्वगाऽचला २
एकानेकविभागस्था मायातीता सुनिर्मला
महामाहेश्वरी सत्या महादेवी निरञ्जना ३
काष्ठा सर्वान्तरस्थापि चिच्छक्तिश्चात्रिलायिता
सर्वासर्वात्मिका विश्वा ज्योतीरूपाक्षरामृता ४
शान्ता प्रतिष्ठा सर्वेषा निवृत्तिरमृतप्रदा
व्योममूर्त्तिर्व्योमसंस्था व्योमधाराऽच्युताऽतुला ५
अनादिनिधनाऽमोघा कारणात्मकलाकुला

ऋतुः प्रथमजा नाभिरमृतात्मसमाश्रया ६
प्राणेश्वरप्रिया नम्या महामहिषघातिनी
प्राणेश्वरी प्राणरूपा प्रधानपुरुषेश्वरी ७
सर्वशक्तिकलाकामा महिशेष्टविनाशिनी
सर्वकायनियन्त्री च सर्वभूतेश्वरेश्वरी ८
अङ्गदादिधरा चैव तथा मुकुटधारिणी
सनातनी महानन्दा काशयोनिस्तथोच्यते ९
चित्रकाशस्वरूपा च महायोगेश्वरेश्वरी
महामाया सुदुष्पारा मूलप्रकृतिरीशिका
संसारयोनिः सकला सर्वशक्तिसमुद्भवा १०
संसारपारा दुर्वारा दुर्निरीक्षा दुरासदा
प्राणशक्तिश्च सेव्या च योगिनी परमा कला ११
महाविभूतिर्दुर्द्धर्षा मूलप्रकृतिसंभवा
अनाद्यनन्तविभवा परार्था पुरुषारणिः १२
सर्गस्थित्यन्तकृच्चैव सुदुर्वाच्या दुरत्यया
शब्दगम्या शब्दमाया शब्दाक्षानन्तविग्रहा १३
प्रधानपुरुषातीता प्रधानपुरुषात्मिका
पुराणी चिन्मया पुंसामिष्टदा पुष्टिरूपिणी १४
भूतान्तरस्था कूटस्था महापुरुषसंज्ञिता
जन्ममृत्युजरातीता सर्वशक्तिस्वरूपिणी १५
वाञ्छाप्रधानवच्छिन्नप्रधानानुप्रवेशिनी
क्षेत्रज्ञाचिन्त्यशक्तिस्तु प्रोच्यते व्यक्तलक्षणा १६
मलापवर्जितानादिमाया त्रितयतत्त्विका
त्रीतिश्च प्रकृतिश्चैव गुहावासातथोच्यते

महामायानगोत्वन्ना तामसी तद्ध्रुवा तथा १७
व्यक्ताव्यक्तात्मिका कृष्णा रक्ता शुक्ला ह्यकारणा
प्रोच्यते कार्यजननी नित्यप्रसवधर्मिणी १८
सर्गप्रलयमुक्ता च सृष्टिस्थित्यन्तधर्मिणी
ब्रह्मगर्भा चतुर्विंशस्वरूपापद्मवासिनी १९
अच्युता क्लादिका विद्युद्ब्रह्मयोनिर्महालया
महालक्ष्मीसमुद्भावभावितात्मा महेश्वरी २०
महाविमानमध्यस्था महानिद्रा सकौटुका
सर्वार्थधारिणी सूक्ष्मा ह्यविद्यापरमार्थदा २१
अनन्तरूपानन्तार्था तथा पुरुषमोहिनी
अनेकानेकहस्ता च कालत्रयविवर्जिता २२
ब्रह्मजन्माहरप्रीता मतिर्ब्रह्मशिवात्मिका
ब्रह्मेशविष्णुसंपूज्या ब्रह्माख्या ब्रह्मसंज्ञिता २३
व्यक्ता प्रथमजा ब्राह्मी महारात्री प्रकीर्तिता
ध्यानस्वरूपावैराग्य रूपाद्यैश्वर्यरूपिणी २४
धर्मात्मिका ब्रह्ममूर्तिः प्रतिश्रुतपुमर्तिका
अपाँ योनिस्वयंभूता मानसीतत्त्वसंभवा २५
ईश्वरस्य प्रियाप्रोक्ता शङ्करार्थशरीरिणी
भवानी चैव रुद्राणी महालक्ष्मीस्तथाम्बिका २६
महेश्वरसमुत्पन्ना भुक्तिमुक्तिप्रदायिनी
सर्वेश्वरी सर्ववन्द्या नित्यमुक्ता सुमानसा २७
महेन्द्रोपेन्द्रनमिता शांकरी शानुवर्तिनी
ईश्वरार्द्धासनगता माहेश्वरपतिव्रता २८
संसारशोषिणी चैव पार्वती हिमवत्सुता

परमानन्दगात्री च गुणाद्व्यायोगदा तथा २९
ज्ञानमूर्तिश्च सावित्री लक्ष्मी श्री कमला तथा
अनन्तगुणगम्भीरा ह्युरोणी लमनिप्रभा ३०
सरोजनिलया गन्दा योगिध्येया सुरार्दिनी
सरस्वती सर्वविद्या जगज्ज्येष्ठा सुमङ्गला ३१
वाग्देवी वरदा वार्या कीर्तिः सर्वार्थसाधिका
वागीश्वरी ब्रह्मविद्या महाविद्या सुशोभना ३२
ग्राह्यविद्या वेदविद्या धर्मविद्यात्मभाविता
स्वाहा विश्वंभरा सिद्धिः साध्या मेधा धृतिः कृतिः ३३
सुनीतिः संकृतिश्चैव कीर्तिता नरवाहिनी
पूजा विभाविनी सौम्या भोग्यभाग्वोगदायिनी ३४
शोभावती शांकरी च लोला माला विभूषिता
परमेष्ठिप्रिया चैव त्रिलोकी सुन्दरी मता ३५
दण्डा संध्या कामधात्री महादेवी सुसात्त्विका
महामहिषदर्पघ्नी पद्ममालाकहारिणी
विचित्रमुकुटारामा कामदाका प्रकीर्तिता ३६
विदाम्बरधरा दिव्यविभूषणविभूषिता
दिव्याख्यासोमवदना जगत्संसृष्टिवर्जिता ३७
निर्यन्त्रा यन्त्रवाहस्था नन्दिनी रुद्रकालिका
आदित्यवर्णा कौमारी मयूरवरवाहिनी ३८
पद्मासनगता गौरी महाकाली सुरार्चिता
अदितिर्नियता रौद्री पद्मगर्भा विवाहना ३९
विरूपाक्षा केशिवाहा गुहापुरनिवासिनी
महाफलाऽनवद्याङ्गी कामरूपा सरिद्वरा ४०

भास्वद्रूपा मुक्तिदात्री प्रणदक्लेशभञ्जना
कौशिकी गोमिनी रात्रिस्त्रिदशारिविनाशिनी ४१
बहुरूपा सुरूपा च विरूपा रूपवर्जिता
भक्तार्तिशमना भव्या भवभावविनाशिनी ४२
सर्वज्ञानपरी ताङ्गी सर्वासुरविमर्दिका
विखस्वनी सामगीता भवाङ्गनिलयाप्रिया ४३
दीक्षा विद्याधरी दीप्ता महेन्द्राहितपातिनी
सर्वदेवमयादक्षा समुद्रान्तरवासिनी ४४
अकलङ्का निराधारा नित्यसिद्धा निरामया ४५
कामधेनुर्बृहद्गर्भा धीमती मौननाशिनी
निःसङ्कल्पा निरातङ्का विनया विनयप्रदा ४६
ज्वालामाला सहस्राढ्या देवदेवी मनोमया
सुभगा सुविशुद्धा च वसुदेवसमुद्भवा ४७
महेन्द्रोपेन्द्रभगिनी भक्तिगम्या परावरा
ज्ञानज्ञेया परातीता वेदान्तविषया मतिः ४८
दक्षिणा दाहिका दह्या सर्वभूतकृतिस्थिता
योगमाया विभागज्ञा महामोहा गरीयसी ४९
संध्या सर्वसमुद्भूता ब्रह्मवक्षाश्रियादितिः
बीजाङ्कुरसमुद्भूता महाशक्तिर्महामतिः ५०
ख्यातिः प्रज्ञावती संज्ञा महाभोगेन्द्रशायिनी
ईंकृतिः शंकरी शान्तिर्गन्धर्वगणसेविता ५१
वैश्वानरी महाशूला देवसेना भवप्रिया
महारात्री परानन्दा शची दुःस्वप्ननाशिनी ५२
इड्या जया जगद्धात्री दुर्विज्ञेया सुरूपिणी

गुहाम्बिका गणोत्पन्ना महापीठा मरुत्सुता ५३
भव्यवाहाभवानन्दा जगद्योनिः प्रकीर्तिता
जगन्माता जगन्मृत्युर्जरातीता च बुद्धिता ५४
सिद्धिदात्री रत्नगर्भा रत्नगर्भाश्रयापरा
दैत्यहन्त्री स्वेष्यदात्री मङ्गलैकसुविग्रहा ५५
पुरुषान्तर्गता चैव समाधिस्था तपस्विनी
दिविस्थिता त्रिनेत्रा च सर्वेन्द्रियमनाकृतिः ५६
सर्वभूतहृदिस्था च तथा संसारतारिणी
वेद्या ब्रह्मविवेद्या च महानीला प्रकीर्तिता ५७
ब्राह्मणी बृहती ब्राह्मी ब्रह्मभूधातहारिणी
हिरण्मयी महादात्री संसारपरिवर्त्तिका ५८
सुमालिनी सुरूपा च भास्विनी धारिणी तथा
उन्मोलिनी सर्वसभा सर्वप्रत्ययसाक्षिणी ५९
सुसौम्या चन्द्रवदना ताण्डवासक्तमानसा
सत्त्वशुद्धिकरी शुद्धा मलत्रयविनाशिनी ६०
जगत्त्रयी जगन्मूर्तिस्त्रिमूर्तिरमृताश्रया
विमानस्थाविशोका च शोकनाशिन्यनाहता ६१
देवकुण्डलिणी काली पद्मवासासनातनी
सदाकीर्तिस्सर्वभूतशयादेवी तथाम्प्रिया ६२
ब्रह्ममूर्तिकला चैव कृत्तिका कण्डमालिनी
व्योमकेशा क्रियाशक्तिरिच्छाशक्तिः परागतिः ६३
क्षोभिका खण्डिका भेद्या भेदाभेदविवर्जिता
अभिन्नाभिन्नसंस्थाना वशिनी वंशधारिणी ६४
गुह्यशक्तिर्गुह्यतत्त्वा सर्वदा सर्वतोमुखी

भगिनी च निराधारा निराहारा प्रकीर्तिता ६५
निरन्पुशपदोद्भूता चक्रहस्ता विशोधिका
स्त्रग्विणी पद्मसंभेदकारिणी परिकीर्तिता
परावरविधानज्ञा महापुरुषपूर्वजा ६६
परावरज्ञा विज्ञा च विज्ञुज्जिह्वा जिताश्रया
विद्यामयी सहस्राक्षी सहस्रवदनात्मजा ६७
सहस्ररश्मिः सत्त्वस्था महेश्वरपदाश्रया
ज्वालिनी सन्मया व्याप्ता छिन्मया पद्मभेदिका ६८
महाश्रया महामन्त्रा महादेवमनोरमा
व्योमलक्ष्मी सिंहरथा चेकितानाऽमितप्रभा ६९
विश्वेश्वरी भगवती सकला कालहारिणी
सर्ववेद्या सर्वभद्रा गुह्या गूढा गुहारणी ७०
प्रलया योगधात्री च गन्दाविश्वेश्वरी तथा
कामदा कनका कान्ता कञ्जगर्भप्रभा तथा ७१
पुण्यदा कालकेशा च भोक्त्री पुष्करिणी तथा
सुरेश्वरी भूतिधात्री भूतिभूषा प्रकीर्तिता
पञ्चब्रह्मसमुत्पन्ना परमार्थार्थविग्रहा ७२
वर्णोदया भानुमूर्तिर्वाग्विज्ञेया मनोजवा
मनोहरा महोरस्का तामसी वेदरूपिणी ७३
वेदशक्तिर्वेदमाता वेदविद्याप्रकाशिनी
योगेश्वरेश्वरी माया महाशक्तिर्महामयी ७४
विश्वान्तस्था वियन्मूर्तिर्भार्गवी सुरसुन्दरी
सुरभिर्नन्दिनीविद्या नन्तगोपतनूद्भवा ७५
भारती परमानन्दा परावरविभेदिका

सर्वप्रहरणोपेता काम्या कामेश्वरेश्वरी ७६
अनन्तानन्तविभवा हृल्लेखा कनकप्रभा
कूष्माण्डा धनरत्नाढ्या सुगन्धा गन्धदायिनी ७७
त्रिविक्रमपदोद्भूता जटुरास्या शिवोदया
सुदुर्लभा धनाध्यक्षा धन्या पिङ्गललोचना ७८
शान्ता प्रभास्वरूपा च पङ्कजायतलोचना
इन्द्राक्षी हृदयान्तस्था शिवामाता च सत्क्रिया
गिरिजा च सुगूढा च नित्यपुष्टा निरन्तरा ७९
दुर्गाकात्यायनी चण्डी चन्द्रिका कान्तविग्रहा ८०
हिरण्यवर्णा जगती जगद्यन्त्रप्रवर्तिका
मन्दराद्रिनिवासा च शारदा स्वर्णमालिनी ८१
रत्नमाला रत्नगर्भा भ्युष्ठिर्विश्वप्रमाथिनी
पद्मानन्दा पद्मनिभा नित्यपुष्टा कृतोद्भवा ८२
नारायणी दुष्टशिक्षा सूर्यमाता वृषप्रिया
महेन्द्रभगिनी सत्या सत्यभाषा सुकोमला ८३
वामा च पञ्चतपसां वरदात्रीप्रकीर्तिता
वाचवर्णेश्वरी विद्या दुर्जया दुरतिक्रमा ८४
कालरात्रिर्महावेगा वीरभद्रप्रिया हिता
भद्रकाली जगन्माता भक्तानां भद्रदायिनी ८५
कराला पिङ्गलाकारा कामभेत्री महामना
यशस्विनी यशोदा च षडध्वपरिवर्त्तिका ८६
शङ्खिनी पद्मिनी संख्या सांख्ययोगप्रवर्तिका
चैत्रा निर्वत्सरारूढा जगत्संपूरणीन्द्रजा ८७
शुम्भघ्नी खेचरा राध्या कम्बुग्रीवा वलीहिता

खगारूढा महैश्वर्या सुपद्मनिलया तथा ८८
विरक्ता गरुडस्था च जगती हृद्गुहाश्रया ८९
शुम्भादिमथनाभक्तहृद्गह्वरनिवासिनी
जगत्त्रयारणी सिद्धसंकल्पाकामदा तथा ९०
सर्वविज्ञानदात्री चानल्पकल्मशहारिणी
सकलोपनिषड्गम्या दुष्टदुष्प्रेक्ष्यसत्तमा ९१
सद्वृता लोकसंव्याप्ता तुष्टिः पुष्टिः क्रियावती
विश्वामरेश्वरी चैव भुक्तिमुक्तिप्रदायिणी ९२
शिवाधृतालोहिताक्षी सर्पमालाविभूषणा
निरानन्दात्रिशूल्लासिधनुर्बाणादिधारिणी ९३
अशेषज्ञेयमूर्तिश्च देवतानां च देवता
वराम्बिका गिरेपुत्री निशुम्भविनिपातिनी ९४
सुवर्णा स्वर्णलसिता नन्तवर्णासदाधृता
शाङ्करी शान्तहृदया अहोरात्रविधायिका ९५
विश्वगोप्त्री गूढरूपा गुणपूर्णा च गार्ग्यजा
गौरीशाखम्बरी सत्यसंधासंध्यात्रयीकृता ९६
सर्वपापविनिर्मुक्ता सर्वबन्धविवर्जिता
सांख्ययोगसमाख्याता अप्रमेयामुनीरिता ९७
विशुद्धसुकुलोद्भूता बिन्दुनादसमाधृता
शम्भुवामाङ्कगा चैव शशितुल्यनिभानना ९८
वनमालाविराजन्ती अनन्तशयनाधृता
नरनारायणोद्भूता नारसिंही प्रकीर्तिता ९९
दैत्यप्रमाथिनीशङ्खचक्रपद्मगदाधरा
संकर्षणसमुत्पन्ना अम्बिकासज्जनाश्रया १००

सुवृता सुन्दरी चैव धर्मकामार्थदायिनी
मोक्षदाभक्तिनिलया पुराणपुरुषाधृता १०१
महाविभूतिदा राध्या सरोजनिलया समा १०२
अष्टादशभुजाऽनादिर्नीलोत्पलदलाक्षिणी
सर्वशक्तिसमारूढा धर्माधर्नविवर्जिता १०३
वैराग्यज्ञाननिरता निरालोका निरिन्द्रिया
विचित्रगहनाधारा शाश्वतस्थानवासिनी १०४
ज्ञानेश्वरी पीतचेला वेदवेदाङ्गपारगा
मनस्विनी मन्युमाता महामन्युसमुद्भवा १०५
अमन्युरमृता स्वादा पुरन्दरपरिष्टुता
अशोच्याभिन्नविषया हिरण्यरजतप्रिया १०६
हिरण्यजननी भीमा हेमाभरणभूषिता
विभ्राजमाना दुर्ज्ञेया ज्योतिष्टोमफलप्रदा १०७
महानिद्रासमुद्भक्तिरनिद्रा सत्यदेवता
दीर्घाककुद्मिनी पिङ्गजठाधारा मनोज्ञतीः १०८
महाश्रयारमोत्पन्ना तमःपारे प्रतिष्ठिता
त्रितत्त्वमाता त्रिविधा सुसूक्ष्मापद्मसंश्रया १०९
शान्त्यतीतकलातीतविकाराश्वेतचेदिका ११०
चित्रमाया शिवज्ञानस्वरूपा दैत्यमाथिनी
काश्यपी कालसर्पाभवेनिकाशास्त्रयोनिका १११
त्रयीमूर्तिः क्रियामूर्तिश्चतुर्वर्गा च दर्शिनी
नारायणी नरोत्पन्ना कौमुदी कान्तिधारिणी ११२
कौषिकी ललिता लीला परावरविभाविनी
वरेण्याद्भुतमाहात्म्य वणवावामलोचना ११३

सुभद्रा चेतना राज्या शान्तिदा शान्तिवर्धिनी
जयादिशक्तिजननी शक्तिचक्रप्रवर्तिका ११४
त्रिशक्तिजननी जन्या षट्सूत्रपरिवर्णिता
सुधौतकर्मणा राज्या युगान्तदहनात्मिका
संकर्षिणी जगद्धात्री कामयोनिः किरीटिनी ११५
ऐन्द्री त्रैलोक्यनमिता वैष्णवी परमेश्वरी
प्रद्युम्नजननी बिम्बसमोष्ठी पद्मलोचना ११६
मदोत्कटा हंसगतिः प्रचण्डा चण्डविक्रमा
वृषातीशापरात्मा च विन्ध्यापर्वतवासिनी ११७
हिमवन्मेरुनिलया कैलासपुरवासिनी
चाणूरहन्त्रीनीतिज्ञा कामरूपात्रयीधनुः ११८
व्रतस्नाता धर्मशीला सिंहासननिवासिनी
वीरभद्राकृता वीरा महाकालसमुद्भवा ११९
विद्याधरार्चिता सिद्धसाध्याराादितपादुका
श्रद्धात्मिका पावनी च मोहिनी अचलात्मिका १२०
महाद्भुता वारिजाक्षी सिंहवाहनगामिनी
मनीषिणी सुधावाणी वीणावादनतत्परा १२१
श्वेतवाहनिषेभ्या च लसंमतिररुन्धती
हिरण्याक्षी तथा चैव महानन्दप्रदायिनी १२२
वसुप्रभासुमाल्याप्तकन्धरापङ्कजानना
परावरावरारूहा सहस्रनयनार्चिता १२३
श्रीरूपा श्रीमती श्रेष्ठा शिवनाम्नी शिवप्रिया
श्रीप्रदा शृतकल्याणा श्रीधरार्द्धशरीरिणी १२४
श्रीकलानन्ददृष्टिश्च ह्यक्षुद्रारातिसूदनी

रक्तबीजनिहन्त्री च दैत्यसङ्घविमर्दिनी १२५
सिंहारूढा सिंहिकास्या दैत्यशोणितपायिनी
सुकीटिसहिताछिन्ना संशयारसवेदिनी १२६
गुढाभिरामानागाहि वाहनानिर्भ्रराचिंता
नित्योदिता स्वयंज्योतिस्वन्नकायाप्रकीर्तिता १२७
वज्रदण्डाङ्किता चैव तथा मृतसजीविनी
वर्द्रक्छन्ना देवदेवी वरवद्रस्सविग्रहा १२८
माङ्गल्या मङ्गलात्मा च मालिनी माल्यधारिणी
गन्धर्वी तरुणी चान्द्री कड्गायुधतरा तथा १२९
सौदामिनी प्रज्ञानन्दा तथाप्रोक्तावृगूद्भवा
एकानङ्गा च शास्त्रार्थकुशलाधर्मचारिणी १३०
धर्मसर्वस्ववाहा च धर्माधर्मविनिश्चया
धर्मशक्तिर्धर्ममया धार्मिकानां शिवप्रदा १३१
विधर्मा विश्वधर्मज्ञा धर्मार्थान्तरविग्रहा
धर्मवर्ष्माधर्मपूर्वा धर्मपारङ्गतान्तरा १३२
धर्मोपदेष्ट्री धर्मात्मा धर्मगम्या धराधरा १३३
कपालिनी शाकलिनी कला कलितविग्रहा
सर्वशक्तिविमुक्ता च कर्णिकारधराद्धरा १३४
कंसप्राणहरा चैव युगधर्मतरा तथा
युगप्रवर्तिका प्रोक्ता प्रिसन्ध्याध्येयविग्रहा १३५
स्वर्गापवर्गदाप्रीत तथाप्रत्यद्धदेवता
आदित्या दिव्यगन्धा च दिवाकरनिभप्रभा १३६
पद्मासनगता प्रोक्ता कड्गवाणशरासना
शिष्टाविशिष्टा शिष्टेष्टा शिष्टः श्रेष्ठप्रबोजिता १३७

शतरूपा शतावर्ता वितता रासमोदिनी
सूर्येन्दुनेत्राप्रद्युम्नजननी सुष्ठुमायिनी १३८
सूर्यान्तरस्थिता चैव सत्प्रपिष्ठितविग्रहा
निवृत्ता प्रोच्यते ज्ञानपारगा पर्वतात्मजा १३९
कात्यायनी चण्डिका च चण्डीहैमवती तथा
दाक्षायनी सती चैव भवानी सर्वमङ्गला १४०
धूम्ररोचनहन्त्री च चण्डमुण्डविनाशिनी
योगनिद्रायोगभद्रा समुद्रतनया तथा १४१
देवप्रियङ्करी शुद्धा भक्तभक्तिप्रवर्धिनी
त्रिनेत्राचन्द्रमुकुटा प्रमतार्चितपादुका १४२
अर्जुनाभीष्टदा प्रीत्यपाण्डवप्रियकारिणी
कुमारलालनासक्ता हरबाहू पदानिका १४३
विघ्नेशजननीभक्तविघ्नस्तोमप्रहारिणी
सुस्मितेन्दुमुखी नम्या जयाप्रियसखी तथा १४४
अलादिनिधना प्रेष्ठा चित्रमाल्यानुलेपना
भोतिचन्द्रप्रतीकाशा पूतजालप्रमाथिनी १४५
कृत्याप्रहारिणी चैव मारणोच्चातनी तथा
सुरासुरप्रवन्द्याङ्घ्रिर्मोहघ्नी ज्ञानदायिनी १४६
षड्वैरिनिग्रहकरी वैरिविद्राविनीतथा
भूतसेव्या भूतधात्री भूतपीडाविमर्दिका १४७
नारगस्तुतचारित्रा वरदेशावरप्रदा
वामदेवस्तुता चैव कामदासोमशेखरा १४८
वित्पालसेविता भौव्या भामिनी भावदायिनी
स्त्रीसौभाग्यप्रदात्री च भोगदा भोगनाशिनी १४९

व्योमगा भूमिगा चैव मणिपूज्यपदाम्बुजा
वनदुर्गा च दुर्बोधा महादुर्गा प्रकीर्तिता १५०

Reference:
Gupta, Anand Swarup, ed., *The Kūrma Purāṇa*, (Vārānasi: All-India Kashiraj Trust, 1971).